द्वितीयः पाठः २

# विद्यायाः बुद्धिरुत्तमा

## ( अव्ययानां प्रयोगः )

प्रस्तुतः पाठः विष्णुशर्मणा विरचितात् पञ्चतन्त्रात् कथाग्रन्थात् उद्धृतः। अस्यां कथायां ब्राह्मणबालकानां माध्यमेन विद्यायाः अपेक्षया बुद्धेः श्रेष्ठता सम्पादिता।



कस्मिंश्चिद् ग्रामे चत्वारो ब्राह्मणपुत्राः परस्परं मित्रभावेन वसन्ति स्म। चतुर्षु त्रयः शास्त्रपारङ्गताः **परन्तु** बुद्धिरहिताः। एकस्तु बुद्धिमान् **किन्तु** शास्त्रविमुखः। ते कदाचिद् मन्त्रणाम् अकुर्वन्– ''यदि विदेशं गत्वा प्रभूतं धनं नार्जयाम तर्हि विद्यया किं प्रयोजनम् ? तत् पूर्वदेशं गच्छामः।''

एवं किञ्चिद् मार्गं गते तेषु ज्येष्ठतरः अवदत् – ''अहो! अस्मासु एकः अशिक्षितः **केवलम्** अस्ति बुद्धिमान्। न च राजप्रतिग्रहो बुद्धिबलेन प्राप्स्यति विद्यां **विना**। **अतः** अस्मै स्वोपार्जितं धनं **न** दास्यामि। त्वं स्वगृहं गच्छ यतस्ते विद्या नास्ति।'' ततः द्वितीयः अवदत् – ''भोः सुबुद्धे! त्वं स्वगृहं गच्छ **यतस्त्वं** विद्यारहितः असि।'' **ततः** तृतीयेन उक्तम् – ''**अहो** नोचितम् एवं कर्तुं **यतो** हि वयं बाल्यकालाद् **एव** एकत्र क्रीडिताः। **अतः** आगच्छतु महानुभाव! भवान् अस्मद् उपार्जितस्य वित्तस्य समभागी भविष्यति।''



तथा कृते ते मार्गे अरण्यस्य **अन्तः** कतिचिद् अस्थीनि अपश्यन् **ततः** एकेनोक्तम्– ''अहो अद्य विद्याप्रत्ययः कर्तव्यः। किञ्चिद् सत्वम् एतद् मृतं तिष्ठति। तद् विद्याप्रभावेण जीवनसहितं कुर्मः। अहम् अस्थिसञ्चयं करोमि।'' ततः तेनोत्सुकतया अस्थिसञ्चयः कृतः।

द्वितीयेन क्रमशः चर्ममांसरुधिरं च संयोजितम्।

तृतीयः **अपि** यावज्जीवनं सञ्चारयति तावत् सुबुद्धिः निषेधितवान् अवदच्च – ''भोः तिष्ठतु भवान्। एषः सिंहः रच्यते। यदि एनं सजीवं करिष्यति **चेद्** अयं निश्चयेन सर्वान् **अपि** खादिष्यति।''



सः अकथयत्–''**धिङ्** मूर्ख! **तूष्णीं** भव। अहं विद्यां विफलां न करोमि **सम्प्रति**।'' तेन बुद्धिमता उक्तम्–''**तर्हि** प्रतीक्षां कुरु क्षणं यावत्, अहं वृक्षम् आरोहामि।'' तथाचरितं **यावत्** सः सजीवः कृतः **तावत्** ते त्रयः अपि सिंहेन उत्थाय मारिताः। सः पुनः वृक्षाद् अवतीर्य गृहं गतः।

अत एवोच्यते –

**वरं बुद्धिर्न सा विद्या, विद्यायाः बुद्धिरुत्तमा।**
**बुद्धिहीना विनश्यन्ति, यथा ते सिंहकारकाः।।**

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
| --- | --- | --- |
| शास्त्रपारङ्गताः | शास्त्रे निपुणाः | शास्त्रों के विद्वान् |
| शास्त्रविमुखः | शास्त्रपराङ्मुखः | शास्त्र से विमुख |
| मन्त्रणाम् | विमर्शम् | सलाह को |
| प्रभूतं | अत्यधिकम् | बहुत अधिक |
| राजप्रतिग्रहः | राजदानम् | राजा द्वारा दिया गया दान |
| वित्तस्य | धनस्य | धन का |
| अस्थीनि | कङ्कालांशानि | हड्डियाँ |
| विद्याप्रत्ययः | विद्यायाः परीक्षा | विद्या की परीक्षा |
| सत्वं | जीवः | प्राणी |
| अरण्यस्य | वनस्य | जंगल को |
| तेनोत्सुकतया | तेन उत्कण्ठापूर्वकम् | उसके द्वारा उत्सुकता से |
| संयोजितम् | समायोजितम् | जोड़ कर खड़ा किया |
| रच्यते | विनिर्मीयते | बनाया जा रहा है |
| तथाचरितम् | तथा कृतम् | वैसा किया |
| तूष्णीम् | मौनम् | चुप |

## अभ्यासः

### मौखिकप्रश्नाः

**१. अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

कस्मिंश्चिद् शास्त्रपारङ्गता शास्त्रविमुखः प्रभूतम्
मन्त्रणाम् अस्थिसञ्चयः तेनोत्सुकतया

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि वदत –**

(क) कतिपुत्राः बुद्धिरहिताः आसन् ?
(ख) कस्य समीपं विद्या नासीत् ?
(ग) चर्ममांसरुधिरं केन संयोजितम् ?
(घ) सिंहं सजीवं कः करोति ?
(ङ) का वरम् अस्ति ?

## लिखितप्रश्नाः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) धनार्जनाय ब्राह्मणपुत्राः कुत्र गच्छन्ति ?

(ख) ''एषः सिंहः रच्यते'' इति कः उक्तवान् ?

(ग) शास्त्रविमुखः कः आसीत् ?

(घ) ते त्रयः केन मारिताः ?

(ङ) कस्मात् बुद्धिः उत्तमा ?

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत -**

(क) प्रस्तुतः पाठः कस्मात् ग्रन्थात् सङ्कलितः ?

(ख) केन प्रभावेन सिंहः सजीवः अभवत् ?

(ग) ''भोः तिष्ठतु भवान्'' इति कः निषेधितवान् ?

(घ) सुबुद्धिः कस्माद् अवतीर्य गृहं गतः ?

(ङ) के विनश्यन्ति ?

**३. रेखाङ्कितपदान् आधारीकृत्य प्रश्ननिर्माणं कुरुत -**

(क) ते मन्त्रणाम् अकुर्वन् ?

(ख) कस्मिंश्चिद् ग्रामे चत्वारो ब्राह्मणपुत्राः वसन्ति स्म ?

(ग) तेन सिंहः सजीवः कृत ?

(घ) प्रथमः अस्थिसञ्चयं करोति ?

(ङ) सुबुद्धिः वृक्षाद् अवतीर्य गृहं गतः ?

**४. मञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत -**

| सिंहेन , वृक्षाद् , बुद्धिमान् , बाल्यकालाद्, एकः , चतुर्थः , विद्या , विद्यायाः , विफलां |
|---|

(क) एकस्तु .......................... किन्तु शास्त्रविमुखः।

(ख) अहो अस्मासु .................................... मूढः।

(ग) त्वं स्वगृहं गच्छ यतस्ते ......................... नास्ति।

(घ) वयं ...............................एव एकत्र क्रीडिताः।

(ङ) ते त्रयः अपि ......................... उत्थाय मारिताः।

**५. उदाहरणं दृष्ट्वा निर्देशानुसारं रिक्तस्थानानि पूरयत -**

**उदाहरणम्** - अतः .............................. स्वोपार्जितं धनं न दास्यामि।

(एतद्शब्दः चतुर्थीविभक्तिः एकवचनम्)

**उत्तरम्** - अतः अस्मै स्वोपार्जितं धनं न दास्यामि।

(क) गच्छ यतः ........................................ विद्या रहितः असि।

(युष्मद्शब्दः प्रथमाविभक्तिः एकवचनम्)

(ख) ते मार्गे ........................................... अन्तः कतिचिद् अस्थीनि अपश्यन्।

(अरण्यशब्दः षष्ठीविभक्तिः एकवचनम्)

(ग) अहं ............................................... विफलां न करोमि।

(विद्याशब्दः द्वितीयाविभक्तिः एकवचनम्)

(ङ) ..................................................... अवतीर्य गृहं गतः।

(वृक्षशब्दः पञ्चमीविभक्तिः एकवचनम्)

**६. उचितपदेन सह सुमेलनं कुरुत -**

| | |
|---|---|
| (क) एकेन | (अ) मारिताः। |
| (ख) द्वितीयेन | (आ) वृक्षारोहणम्। |
| (ग) तृतीयेन | (इ) अस्थिसञ्चयम्। |
| (घ) चतुर्थेन | (ई) चर्ममांसरुधिरसंयोजनम्। |
| (ङ) सिंहेन | (उ) जीवनं सञ्चारणम्। |

**७. उचित अव्ययेन रिक्तस्थानम् पूरयत -**

(क) गृहीत ........... केशेषु मृत्युना धर्ममाचरेत् । ( सह, खलु, इव, च )

(ख) न चौरहार्यं न ........ राजहार्यं न, भ्रातृभाज्यं न च भारकारि । ( यथा, च, तु, ना )

(ग) व्यये कृते वर्धते ........... नित्यं विद्याधनं सर्वधनप्रधानम् । ( एव, इव, च पुनः )

(घ) आत्मनः प्रतिकूलानि परेषां ........... समाचरेत। ( च, यद्यपि, क्व, न )

(ङ) सत्यम् ........... जयते नानृतम्। ( श्वः, अद्य, तदा, एव )

## योग्यता-विस्तार:

### ( क ) ग्रन्थपरिचय:

पञ्चतन्त्रनामकस्य कथाग्रन्थस्य रचयिता विष्णुशर्मा अस्ति। अस्मिन् ग्रन्थे पञ्चतन्त्राणि सन्ति –

१. मित्रभेद: २. मित्रसम्प्राप्ति: ३. काकोलूकीयम् ४. लब्धप्रणाशम् ५. अपरीक्षितकारक:

महिलारोप्य नाम नगरे अमरशक्ति: नाम राजा आसीत्। तस्य बाहुशक्ति:, उग्रशक्ति:, अनन्तशक्तिश्च नामान: त्रय: मूर्खपुत्रा: आसन्। विष्णुशर्मा तान् राजकुमारान् बोधयितुम् एतस्य कथाग्रन्थस्य रचनाम् अकरोत्। अस्मिन् ग्रन्थे पशुपक्षीन् पात्राणि मत्वा सरलभाषया विविधेषु ग्रन्थेषु सूक्तीन् उदाहरणानि च सङ्गृह्य बालकथा: अरचयत्। निश्चयेन कथाग्रन्थोऽयम् बालानां कृते बहु प्रेरणादायक: अस्ति। एतादृशा: कथाग्रन्था: शुकसप्तति:, वैतालपञ्चविंशति: सिंहासनद्वात्रिंशिका, हितोपदेश:, कथासरित्सागर: इत्यादय: सन्ति।

### ( ख ) भाषा विस्तार:

अव्ययप्रयोग: – सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।

अव्ययानां प्रकाराणि – १. उपसर्गा: २. क्रियाविशेषणम् ३. समुच्चयबोधकम्
४. मनोविकारसूचकम् ५. अन्यप्रकीर्णानि च।

## अव्ययज्ञान-तालिका

| क्र.सं. | अव्ययम् | अर्थ | प्रयोग: |
|---|---|---|---|
| १. | यदा | जब | **यदा** श्रीराम: आगच्छति तदा अहं गच्छामि। |
| २. | तदा | जब | **तदा** श्रीकृष्ण: एकम् अश्वम् अपश्यत्। |
| ३. | अत्र | यहाँ | **अत्र** एक: बालक: अस्ति। |
| ४. | सर्वदा | सदा | अहं **सर्वदा** देवालयं गच्छामि। |
| ५. | एव | ही | जलम् **एव** जीवनम् अस्ति। |
| ६. | तत्र | वहाँ | स: **तत्र** पठति। |
| ७. | कदापि | कभी भी | विष्णु: **कदापि** असत्यं न वदति। |
| ८. | अद्य | आज | राधा **अद्य** फलं खादति। |
| ९. | अधुना | अब | **अधुना** अहं गच्छामि। |

| | | | |
|---|---|---|---|
| १०. | शनै: शनै: | धीरे-धीरे | स: **शनै: शनै:** कार्यं करोति। |
| ११. | इतस्तत: | इधर-उधर | नगरे **इतस्तत:** वाहनानि दृश्यन्ते। |
| १२. | कुत्र | कहाँ | बालक: **कुत्र** गच्छति। |
| १३. | सर्वत्र | सब जगह | **सर्वत्र** ईश्वर: अस्ति । |
| १४. | बहुधा | अनेकवार | रमेश: **बहुधा** संस्कृतं वदति। |
| १५. | सर्वथा | सब प्रकार से | **सर्वथा** राष्टहितं करणीयम्। |
| १६. | तूष्णीम् | चुप | सभागारे **तुष्णीं** भवतु। |
| १७. | निश्चयेन | निश्चय ही | अहं **निश्चयेन** कार्यक्रमे आगमिष्यामि। |
| १८. | अन्त: | अन्दर | स्यूतस्य **अन्त:** पुस्तकानि सन्ति। |
| १९. | बहि: | बाहर | रात्रौ सहसा गृहात् **बहि:** न गन्तव्यम्। |